# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

**ISSN 2277 – 9809 (online)**
**ISSN 2348 - 9359 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

**शीर्षकम्**

# शैवकालविवेके पवित्रारोपणकाल विमर्शः

**SATHISH S**
RESEARCH SCHOLAR
THE MADRAS SANSKRIT COLLEGE,
MYLAPORE, CHENNAI -600004

**सारांशः**

शैवागमपरम्परायां कालनिर्णयः सर्वेषां नित्य-नैमित्तिक-काम्यकर्मणामाधारभूतः परिगण्यते। वेदाङ्गज्योतिषस्य यथा वैदिककर्मसु महत्त्वं विद्यते, तथैव शैवागमेषु विविधकर्मानुष्ठानानां कालनिर्णये शैवकालविवेकः इति ग्रन्थः विशेषमुपकरोति। अस्मिन् शोधलेखे श्रीनिगमज्ञानशिवाचार्यविरचितस्य शैवकालविवेकस्य स्वरूपं, प्रयोजनं, वैशिष्ट्यं च विवेचितम्। विशेषतः प्रतिष्ठा, दीक्षा, उत्सव, अभिषेक, स्वकर्म, संस्काराः तथा पवित्रारोपणादीनां कर्मणां कालविधानं विविधागमप्रमाणैः परीक्षितम्। कामिकागम, सूक्ष्मागम, किरणागम, अंशुमत्तन्त्र, मृगेन्द्रागम, सिद्धान्तशेखर, सौभाग्यचिन्तामणि इत्यादिषु निर्दिष्टानां पवित्रारोपणकालविधानानां तुलनात्मकमध्ययनमपि अत्र कृतम्। एतेन ज्ञायते यत् शैवकालविवेकः केवलं कालनिर्णयग्रन्थः न, अपि तु शैवागमीयकर्मपद्धतेः प्रमाणभूतः, समन्वयप्रधानः, व्यवहारोपयोगी च ग्रन्थः अस्ति। अयं ग्रन्थः आधुनिकेष्वपि शैवमन्दिराचारेषु तथा आगमिकसंस्कारेषु मार्गदर्शकत्वेन महत्त्वपूर्णं स्थानमधितिष्ठति।

**उपोद्घाथः**

अनाथेन विद्यमाण परमेश्वरस्य स्वरूपम् वेदम् । तस्य वेदस्य अङ्गानि षड् भवन्ति । यथा ज्यौतिषम्, व्याकरणम्, छन्दः, निरुक्तम्, कल्पम् एवं शिक्षा इति । तत्र ज्यौतिष शास्त्रमेव कालस्य प्रकाशम् करोति । तथा कालस्य गणनम् अपि करोति । केवलं अनेन ज्योतिष शास्त्रेणैव वा । किमर्थं ज्योतिष शास्त्रं कालस्य प्रकाशं करोति इत्यत्र वेदोक्तेन कर्माणि कर्तुं कारयितुम् च अर्थात् वेदोक्त नित्य-नैमित्तिक-काम्य कर्माणि कस्मिन् काले कर्तव्यम् एवं तत् कालं कीदृशं भवेत् तथा कालस्य निर्माणमित्यादि प्रशनानां ज्ञानम् प्रददाति ज्यौतिष शास्त्रम् । एवमेव आगमानामपि भवति । तत्र तस्मिन् मतोक्त कार्याणि कर्तुं कारयितुं च कालानि उच्यते । तादृश तन्त्रेषु अर्थात् यः शिवः भवति सैव शैवागमः इति उच्यते । तस्मिन् शैवागमे काल विवेचनं भवति । किमर्थं इति चेत् ये शैवमते विद्यमान कर्माणि अनुष्टाणं कुर्वन्ति तेषां काल विषयं एवं परमेश्वरस्य पूजनं, हवनं, प्रोक्षणं, स्थापनम् इत्यादि कार्याणि कदा कर्तव्यम्, तस्य कालस्य निर्माणं कथं कर्तव्यम् इति एतादृश विषयानां ज्ञानं प्रददाति शैवागमाः । अत्र अष्टाविंशति शैवागमाः सन्ति ।

तद्यथा

**कामिकं योगजं चिन्त्यं कारणं अजितं तथा ।**

**दीप्तं सूक्ष्मं सहस्रं च अम्शुमान् सुप्रभेदकम् ।।**

**विजयं चैव निश्वासं अथानलम् ।**

**वीरं च रौरवं चैव मकुटं विमलं तथा ।।**

**चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।**

**सिद्धं सन्तानशार्वोक्तं पारमेश्वरमेव च ।**

**किरणं वातुलं चैवाप्यष्टाविंशति सञ्ज्ञकाः ।।** [1]इति ।

एवं उपागमाः अपि सन्ति । आगमेषु विद्यमाण कार्याणि बहुविधं सन्ति । तानि कार्याणि केन प्रकारेण कर्तव्यम् इत्यत्र आगमे पादचतुष्टयेन विवेचनं करोति । तत्र क्रिया, चर्या, योगं तथा ज्ञानम् इति पादाः आगमे भवन्ति । तेषु पादेषु कर्माणां विवेचनम् करोति । आगमेषु बहुविध कार्याणाम् पृथक् पृथक्तया कालविवेचनं तत् तत् कार्यानुसारेण भवन्ति । अर्थात यत्र क्रिया विषयमुच्यते तत्र पूर्वं तस्याः क्रियायाः कालमुच्यते । तान् विषयान् आगमेषु दृष्ट्वा तानि कार्याणि कर्तुं कश्चित् श्रमः भवत्येव ।यथा वेदस्य चक्षुर्वत् ज्यौतिष शास्त्रं भवति तथा आगमस्य कश्चन ग्रन्थाः सन्ति । तत्र तेषु यथा नक्षत्रेषु चन्द्रः प्रकाशति तथा आगम ग्रन्थेषु "**शैवकाल विवेकः**" प्रकाशति ।

**ग्रन्थ कर्तुः परिचयः**

शैवकाल विवेकः इत्यस्य ग्रन्थस्य कर्ता भवति श्री निगमज्ञान शिवाचार्यः इति । एते व्याघ्रपुरी इति नगरे वासितमिति तैः कृत ग्रन्थेषु दृश्यते । अस्य आचार्यस्य उपकारं तु अत्युन्नतं भवति । अनेन आचार्येण आत्मार्थपूजा पद्धति, आत्मयजनम्, शैवप्रतिष्ठाविधिः, भाषामञ्जरी, अरुणाचल महातीर्थ स्थलीवैभवं, सिद्धान्तोक्तविशेषतत्वनिवहव्याख्या, क्रियारत्नोल्लेखः इत्यादि ग्रन्थाः कृतं भवति । अस्य ग्रन्थस्य व्याख्याकारः भवति श्री गणपतिभट्टः इति ।

**स्वीकृतविषय प्रस्तावनम्**

अथ पवित्रम् इत्यत्र पविः इति अस्मात् त्रायते इति पवित्रम् । "**कुलिशं भिदुरं पविः**[2]" इत्यमरः । एतादृश पवित्र समर्पण कालः बहुविध प्रकारेण भवति । तत्र कीदृशं निर्माणं कर्तव्यं, कथं काल निर्णयं कर्तव्यम् इत्यादि विषयाणां प्रतिपादनं नु आचार्येण सुलभतया विमर्शितं भवति । तस्य पवित्रारोपण कालस्य श्लोकं भवति । तद्याथा

**आषाढादित्रिमासश्शिवमतगदिताः श्रेष्ठमध्याधमास्स्युः**

**पक्षे शुक्ले च कृष्णे भवति शिवतिथिश्चाष्टमि भुक्तिमुक्त्योः ।**

**एते ग्राहये च भानोरुदयविलयगे चेत्पवित्रं क्रमात्स्यात्**

**षष्ठ्याद्यावासपूर्वा नियमविधियुतैर्वर्जयित्वाधिमासम् ।।**[3]

---

[1] सुप्रभेदागमः - तन्त्रावतारविधिपटलमं

[2] अमरकोशम्- 1

[3] शैवकालविवेकम् – 19

अत्र आषाठादि त्रिमासेषु अर्थात् आषाढा, श्रावणा, भाद्रपदा इति एतेषु मासेषु पवित्र समर्पणं कर्तव्यमिति उच्यते । तत्रापि तेषु मासेषु उत्तमं, मध्यमम्, अधमम् इति क्रमेण त्रिमासेषु आषामासः उत्तमं तथा श्रावणमासः मभ्यमम् एवं भाद्रपदा मासः अधमम् इति उच्यते । एतेषु मासेषु यदि पवित्र समर्पणं न कृतं चेत् तथा कदा कर्तव्यम् इत्यास्मिन् विषये कामिकागमे एवं कथ्यते । तद्यथा

**आषाढादित्रिमासाश्च ज्येष्टमध्यमकन्यसाः ।**

**अश्विनी कृत्तिका मासावथवा सम्प्रकीर्तितौ**[4]।। इति

पूर्वोक्त मासत्रयेषु कर्तुं अशक्यते चेत् आश्विनम् तथा कृत्तिका मासे कर्तव्यम् इति उच्यते । अत्र मासाः तु चान्द्रमान प्रकारेण उच्यते । तेषां चन्द्रमान मासानां सम सौर मासाः । अर्थात आषाढा इत्युक्ते सौरमान सम मासः कर्कटक मासः भवति । एवमेव श्रावणमिति चेत् सौरमाने सिंह्म मासः ग्राह्यः । तथा भाद्रपदा इत्यत्र कन्या इति सौरमाने भवति । एवमेव आश्विनमिति तुलामासः तथा कृत्तिका इति वृश्चिकमासः एतेषु करणीयमिति उच्यते । अयमेव विषयः सूक्ष्मागमे दृश्यते

**आषाढादित्रिमासेषु तुलायां वृश्चिकेपि वा ।**

**न्यूनादिपूरणार्थं च पवित्रारोपणं कुरु**[5]।।

इत्यनेन श्लोकेन द्रष्टुं शक्यते । एवं मृगेन्द्रे "**श्रावणे तदुपान्ते वा नभस्य वाश्विमासि वा**[6]" ।। इति पङ्क्तिः ग्राह्यः भवति । तथा च किरणे

"**चतुरो वार्षिकान्मासान्नियमेन नयेत् खग**[7]" ।। इति भवति। अंशुमत्तन्त्रे अपि पवित्रारोपण कालः उच्यते । तद्याथा

"**आषाढे श्रावणे मासे प्रोष्टमासे तथैव च**[8]"

तथा "**अश्विनी कृत्तिकामासे पवित्रारोपणं कुरु**[9]" इत्यादि वचनात् पवित्रारोपण कालः लभ्यते । एवं सिद्धान्तशेखरे

**रवौ गते कर्कटकाख्यराशिं सुप्ते मुरारौ मलमास वर्ज्यम् ।**

**आषाढमासे प्रवरं पवित्रं तच्छ्रावणे मध्यममन्यदन्त्यम् ।।**[10]

इति अस्मात् श्लोकात् ज्ञायते । अत्र मतान्तरे अर्थात महर्षिः श्रीदुर्वासः विरचित सौभाग्यचिन्तामणिः इत्यस्मिन् ग्रन्थे पवित्रारोपण प्रतिपादन सन्दर्पे उत्तमं तु नभमासः तथा मध्यमं नभस्य मासः एवं च अधमं इष मासः इति ग्राह्यः भवति । तद्याथा

**उत्तमश्च नभोमासो नभस्यश्चैव मध्यमः ।**

**इषो मासोधमो ज्ञेयस्तस्मादेतन्न लङ्घयेत्**[11]।।

---

[4] कामिकागमम्
[5] सूक्ष्मागमम्
[6] मृगेन्द्रागमम्
[7] किरणागमम्
[8] शैवकालविवेकः
[9] शैवकालविवेकः
[10] शैवकालविवेकः
[11] सौभाग्यचिन्तामणिः

अस्मात् श्लोकात् देव्याः पवित्रारोपण विषयाः दृश्यते । अर्थात् नभो नाम श्रावणमासः तथा नभस्य नाम भाद्रपदा मासः एवं च इषो नाम आश्विन मासः इति । तथा

**श्रावणे मासि पूर्णायां पवित्रैः पूजयेच्छिवाम्**[12]।।

इत्यादि वचनेन ज्ञायते यत् अन्यतन्त्रेष्वपि पवित्रारोपणकालः शैवकालविवेक अविरोधेन दृश्यते ।

**उपसंहारः**

उपसंहरतः ज्ञायते यत् **शैवकालविवेकः** शैवागमपरम्परायां कालनिर्णये प्रमाणभूतः, समन्वयात्मकः, व्यवहारोपयोगी च ग्रन्थः अस्ति। विविधागमप्रमाणानां तुलनात्मकविवेचनेन अस्य प्रामाणिकता तथा शैवकर्मानुष्ठानेषु तस्य अनिवार्योपयोगिता सुस्पष्टा भवति।

Bibliography

1. निगमज्ञानशिवाचार्यः. शैवकालविवेकः. (सहित-व्याख्या, श्रीगणपतिभट्टविरचिता).

DEVAKOTTAI SHAIVAGAMA SANGAMAM

2. कामिकागमः

SOUTH INDIAN ARCHAKA'S ASSOCIATION,

NO.11, THAMBU CHETTY STREET, MADRAS -600001

3. सूक्ष्मागमः

French Institute of Indology.

4. किरणागमः

N. R. Bhatt (ed.). Kiraṇāgama. Pondicherry: French Institute of Indology.

5. मृगेन्द्रागमः

French Institute of Indology.

6. सौभाग्यचिन्तामणिः

SRI KANCHI KAMAKOTI PEETAM

SRI SHANKARACHARYA SRIMATAM SAMASTHANAM

BANGARU KAMAKSHIAMMAN KOIL

WEST MAIN STREET, THANJAVUR-613009

7. अमरकोष

CHOWKAMBA VIDYABAVAN,

1069, VARANASI- 221001

---

[12] सौभाग्यचिन्तामणिः

## ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




RESEARCH GATEWAY




AROGYAM ONLINE




## PARIVARTAN PSYCHOLOGY CENTER






भारतीय भाषा, शिक्षा, साहित्य एवं शोध
ISSN 2321 – 9726
WWW.BHARTIYASHODH.COM

INTERNATIONAL RESEARCH JOURNAL OF
MANAGEMENT SCIENCE & TECHNOLOGY
ISSN – 2250 – 1959 (0) 2348 – 9367 (P)
WWW.IRJMST.COM

INTERNATIONAL RESEARCH JOURNAL OF
COMMERCE, ARTS AND SCIENCE
ISSN 2319 – 9202
WWW.CASIRJ.COM

INTERNATIONAL RESEARCH JOURNAL OF
MANAGEMENT SOCIOLOGY & HUMANITIES
ISSN 2277 – 9809 (0) 2348 - 9359 (P)
WWW.IRJMSH.COM

INTERNATIONAL RESEARCH JOURNAL OF SCIENCE
ENGINEERING AND TECHNOLOGY
ISSN 2454-3195 (online)

WWW.RJSET.COM

INTEGRATED RESEARCH JOURNAL OF
MANAGEMENT, SCIENCE AND INNOVATION
ISSN 2582-5445

WWW.IRJMSI.COM

JOURNAL OF LEGAL STUDIES,POLITICS
AND ECONOMICS RESEARCH

WWW.JLPER.COM